हेमचन्द्रः॥ (न्यायमते पञ्चकर्म्ममध्यपरिगणितम्। यथा भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"। ६॥)

उत्खला, स्त्री, (उत् + खल + अच् + टाप्।) मुरानाम गन्धद्रव्यम्। तत्पर्य्यायः। तालपर्णी २ तालपर्णं ३ तालाख्या ४ खरा ५। इति शब्दचन्द्रिका॥ (मुराशब्देऽस्या विवरणं ज्ञेयम्॥)

उत्खातं, त्रि, (उत् + खन + क्त।) उन्मूलितम्। इति जटाधरः॥ उपड़ान इति भाषा। ("व्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः"। इति रघुवंशे।४।३३। विदारितः। यथा,— "शैलादाशु त्रिनयनवृषोत्खातपङ्कान्निवृत्तः"। इति मेघदूते। ११६॥)

उत्तं, त्रि, (उनत्ति स्म। उन्दी क्लेदने अकर्म्मकत्वात् कर्त्तरि क्तः। नुदविदेति पक्षे नत्वाभावः।) आर्द्रवस्तु। इत्यमरः॥

उत्तंसः, पुं, (उत्तंसयति उत्तंस्यतेऽनेन वा तसिः सौत्रो भूषार्थः। पचाद्यच् हलश्चेति घञ् वा।) कर्णपूरः। कर्णाभरणम्। शेखरः। शिरोभूषणम्। इत्यमरः॥ मतान्तरे क्लीवलिङ्गोऽपि॥ ("नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि"। इति साहित्यदर्पणे। ३य परिच्छेदे॥)

उत्तप्तं, क्ली, (उत् + तप + क्तः।) शुष्कमांसम्। इत्यमरः॥

उत्तप्तः, त्रि, तप्तः। सन्तप्तः। परिप्लुतः। स्नातः। इति मेदिनी॥

उत्तभितं, त्रि, उन्नमितम्। इति श्रीभागवतम्॥

उत्तमः, त्रि, (अतिशयेन उद्गतः। उत् + तमप्। द्रव्यप्रकर्षार्थत्वान्नाम्। यद्वा उत्ताम्यति तमु अच् उत्तम्यते वा घञ्। नोदात्तेति न वृद्धिः।) भद्रः। उत्कृष्टः। तत्पर्य्यायः। प्रधानं २ प्रमुखः ३ प्रवेकः ४ अनुत्तमः ५ मुख्यः ६ वर्य्यः ७ वरेण्यः ८ प्रवर्हः ९ अनवरार्द्ध्यः १० परार्द्ध्यः ११ अग्र्यः १२ प्राग्रहरः १३ प्राग्र्यः १४ अग्रः १५ अग्रीयः १६ अग्रियः १७। इत्यमरः॥ मुखः १८ अग्रणीः १९ तट्टीका॥ (उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः"। इति हितोपदेशः।
"उत्तमादीश्वरात् पुंसः स्पृहान्ते पुत्रमापदि"॥ इति महाभारते॥)

उत्तमः, पुं, वैशिकनामनायकभेदः। तस्य लक्षणम्। "दयिताश्रमप्रकोपेऽपि उपचारपरायणः"। इति रसमञ्जरी॥ प्रियव्रतराजपुत्त्रः। स च तृतीयमनुः। अस्मिन् मन्वन्तरे सत्यसेनोऽवतारः। सत्यजिदिन्द्रः। सत्यवेदश्रुतभद्रादयो देवाः। वशिष्ठसुताः प्रमदादयः सप्तर्षयः। पवनसृञ्जययज्ञहोत्राद्या मनुपुत्त्राः। इति श्रीभागवतम्॥ (उत्तानपादस्य राज्ञः स्वनामख्यातः पुत्त्रभेदः। यथा, विष्णुपुराणे। १। ११। २॥
"तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः"॥)

उत्तमफलिनी, स्त्री, (उत्तमफलं विद्यते यस्याः। उत्तमफल + इनि + ङीप्।) दुग्धिकाक्षुपः। इति रत्नमाला। दुधीयाइ इति भाषा॥

उत्तमर्णः, पुं, (उत्तमम् ऋणमस्य। ऋणमाधमर्ण्ये इति सूत्रे आधमर्ण्यशब्देन व्यवहारविशेषो लक्ष्यते।) ऋणदाता। इत्यमरः॥ महाजन इति भाषा। तत्पर्य्यायः। ऋणदः २। इति जटाधरः॥ ("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः। दापयेत् धनिकस्यार्थमधमर्णात् विभावितम्"॥ इति मनुः। ८। ४७॥)

उत्तमसंग्रहः, पुं, (उत्तमः संग्रहो यस्मिन्।) सम्यक् संग्रहणम्। तत्तु निर्जने परभार्य्यया सह केशाकेशिपरस्परालिङ्गनसहासनादिरूपमिथुनीभावः। इति मिताक्षरा॥

उत्तमसाहसः, पुं, (उत्तमः साहसोऽस्मिन्।) दण्डविशेषः। स तु साशीतिपणसाहस्रः। यथा। "साशीतिपणसाहस्रो दण्ड उत्तमसाहसः"। इति याज्ञवल्क्यः॥ सहस्रपणमितोऽपि। यथा,
"पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः। मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः"॥ इति मनुः॥

उत्तमा, स्त्री, (अतिशयेन उत्कृष्टा। उत् + तमप् + टाप्।) उत्कृष्टा नारी। तत्पर्य्यायः। वरारोहा २ मत्तकाशिनी ३ वरवर्णिनी ४। इत्यमरः॥ मत्तकाशिणी ५। मत्तकासिनी ६। इति तट्टीका॥ दुग्धिकाक्षुपः। इति मेदिनी॥ स्वीयादिनायिकाभेदः। अस्या लक्षणम्। अहितकारिण्यपि प्रिये हितकारिणी। अस्याश्चेष्टा उत्तमा एव। इति रसमञ्जरी॥

उत्तमाङ्गं, क्ली, (उत्तमं प्रशस्तमङ्गं।) मस्तकं। इत्यमरः॥ ("कश्चित् द्विषत्खड्गहृतोत्तमाङ्गः"। इति रघौ। ७।५१। "बभौ पतद्गङ्ग इवोत्तमाङ्गे"। इति कुमारे।७।४१। मुखम्। यथा, मानवे १।९३॥
"उत्तमाङ्गोद्भवाज्ज्यैष्ठात् ब्राह्मणस्यैव धारणात्। सर्व्वस्यैवास्य सर्गस्य धर्म्मतो ब्राह्मणः प्रभुः"॥ उत्तमाङ्गं मुखं इति तट्टीका॥)

उत्तमारणी, स्त्री, इन्दीवरी। इति राजनिर्घण्टः॥ (इन्दीवरीशब्देऽस्या गुणादिकं बोध्यम्।)

उत्तरं, क्ली, (उत् + तॄ + अप्।) प्रतिवाक्यम्। इत्यमरः॥ जवाव इति यावनी भाषा। (यथा, माघे २। २३।
"वचसस्तस्य सपदि क्रिया केवलमुत्तरम्"।) तस्य व्युत्पत्तिः।
"उत्तीर्य्यते निस्तीर्य्यते प्रकृताभियोगोऽनेन"। तस्य स्वरूपम्।
"पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम्। अव्याख्यागम्यमित्येवमुत्तरं तद्विदो विदुः"॥ तस्य भेदाः।
"मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा। प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः"॥ इति नारदः॥ (अथ उत्तरं नाम साधर्म्म्योपदिष्टे वा हेतौ वैधर्म्म्यवचनं वैधर्म्म्योपदिष्टे वा साधर्म्म्यवचनं यथा हेतुसधर्म्माणो विकाराः शीतकस्य हिमशिशिरवातसंस्पर्शा इति ब्रुवतः परो ब्रूयात् हेतुविधर्म्माणो विकाराः यथा शरीरावयवानां दाहौष्ण्यकोथप्रपचने हेतुवैधर्म्म्यं हिमशिशिरवातसंस्पर्शा इति। एतत् सविपर्य्ययमुत्तरम्। इति चरके विमानस्थानेऽष्टमोऽध्यायः॥)

उत्तरः, पुं, विराटराजपुत्त्रः। इति हेमचन्द्रः॥ (यथा महाभारते ४। गोहरणपर्व्वणि ३५।३३ "तमुत्तरं वीक्ष्य रथोत्तमे स्थितम्"। तत्रैव ३४ "सहोत्तरेणास्तु तदद्य मङ्गलम्")। (स्वनामख्यातपर्व्वतभेदः। यथा, "दक्षिणश्चोत्तरो गिरिः"। इति रामायणे॥ उत्तरयति संसारसागरात् इति व्युत्पत्त्या शिवः। हरिः॥ भारते। १३। १४९। ६६॥)

उत्तरः, त्रि, (उदतिशयेन उद्गतः। उत् + तरप्।) ऊर्द्ध्वः। उदीची। (यथा, रामायणे।
"उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयम्"।) उत्तमः इति मेदिनी अमरश्च॥ (प्रधानं। श्रेष्ठः। यथा, रघुः १३।७।
"सभा इवोपस्थविनः परेभ्यो,
धर्म्मोत्तरं मध्यममाश्रयन्ते"।
"ब्रह्मधर्म्मोत्तरे राज्ये शान्तनुर्विनयात्मवान्" इति महाभारतम्॥) अनन्तरम्।
("वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी। एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम्"॥ इति मनुः। २। १३६॥)

उत्तरकालः, पुं, (उत्तरः कालः।) भविष्यत्कालः। गौणकालः। यथा, हरिहरपद्धतिः।
"एवमागामियागीयमुख्यकालादधस्तनः। स्वकालादुत्तरो गौणः कालः पूर्व्वस्य कर्म्मणः"॥

उत्तरकुरुः, स्त्री, (उत्तरः कुरुः।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः॥
("विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः"।
इति किरातार्ज्जुनीये। १। २५॥)

उत्तरकोशला, स्त्री, (उत्तरे स्थिता कोशला।) अयोध्यानगरी। इति त्रिकाण्डशेषः॥
("पितुरनन्तरमुत्तरकोशलान्
समधिगम्य समाधिजितेन्द्रियः"॥
इति रघुः ९।१॥
"यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्व गतोत्तरकोशला"।
इति उद्भटः॥)

उत्तरक्रिया, स्त्री, (उत्तरा अन्तिमा क्रिया।) अन्त्यक्रिया। सांवत्सरिकश्राद्धादिपित्र्यक्रिया। यथा,
"प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु। क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः"॥ इति विष्णुपुराणम्॥

उत्तरङ्गं क्ली, (उत्तर + गम् + खच्।) द्वारोर्द्ध्वस्थदारु। इति हेमचन्द्रः॥ उद्गततरङ्गे त्रि॥
"प्रत्यग्रहीत् पार्थिववाहिनीं तां
भागीरथीं शोण इवोत्तरङ्गः"॥ इति रघुः।७।३६।

उत्तरणं, क्ली, (उत् + तॄ + ल्युट्।) नद्यादिपारगमनम्। उत्तरण इति भाषा॥